# अथाष्टकवर्गाध्यायः

## शास्त्री-I

**सूर्याष्टकवर्गः—**

केन्द्रायाष्टद्विनवस्वर्कः स्वाद्यार्किभौमतश्च शुभः।
षट्सप्तान्त्येषु सितात् षडायधीधर्मगो जीवात्॥
उपचयगोऽर्कश्चन्द्रादुपचयनवमान्त्यधीगतः सौम्यात्।
लग्नादुपचयबन्धुव्ययस्थितः शोभनः प्रोक्तः॥

अथाष्टकवर्गः जन्मकाले यत्रार्को व्यवस्थितः तस्मात्स्थाना- (केन्द्रायाष्टद्विनवस्सु १।४।७।१०।११।८।२।९ अर्कः शुभः, आर्किभौमाभ्यां एतेषु स्थानेषु शुभः। षट्सप्तान्त्येषु सितात् ६।७।१२ एतेषु शुक्राच्छुभः। चन्द्रादुपचयगाः ३।६।११।१० एतेषु चन्द्राच्छुभः। सौम्यादुपचयनवान्त्यधीसुतः ३।६।११।१०।९।१२।५ एतेषु सौम्याच्छुभः। लग्नादुपचयबन्धुव्ययस्थितः ३।६।११।१०।४।१२ एतेषु लग्नात् शुभः।

भावार्थः— रवि अपने स्थान एवं शनि और मंगल से १।४।७।१०।११।८।२।९ इन स्थानों में शुभ होता है। रवि शुक्र से ६।७।१२ स्थानों में शुभ, गुरु से ६।११।५।९ स्थानों में शुभ, चन्द्रमा से उपचय (३।६।११।१०) स्थानों में शुभ, बुध से ३।६।११।१०।९।१२।५ स्थानों मे शुभ तथा लग्न से ३।६।११।१०।४।१२ स्थानों में शुभ होता है।

डॉ० सुदिष्ट कुमार
सहा० प्राचार्य (ज्योतिष)
रा०उ०सं० महावि० सुखसेना,
पूर्णियाँ।

## शास्त्री-I

Date 08.08.20
Page 2

चन्द्राष्टकवर्गः-

शरमुपचयेषु लग्नात्सायमुनिः स्वात्कुजाष्टनवधीषु।
सूर्यात् साष्टस्मरगस्त्रिषडायसुतेषु सूर्यसुतात ॥
ज्ञात् केन्द्रत्रिसुतायाष्टगो गुरोर्व्ययायमृत्युकेन्द्रेषु।
त्रिचतुःसुतनवदशमद्युनायगश्चन्द्रमाः शुक्रात् ॥

चन्द्रो लग्नात् ३।६।११।१० स्तेषु शुभः। स्वात् स्वस्थानात् प्रथमसप्तमसहितेषूपचयेषु ३।६।११।१०।१।६ स्तेषु शुभः। कुजाष्टनवधीसहितेषूपचयेषु ३।६।११।१०।२।८।५ स्तेषु शुभः। सूर्याष्टसाष्टस्मरगः ३।६।११।१०।८।६ स्तेषु शुभः। शनैश्चरात् त्रिषडायसुतेषु ३।६।११।५ स्तेषु शुभः। बुधात् केन्द्रत्रिसुतायाष्टगः १।४।६।१०।३।५।११।८ स्तेषु शुभः। गुरोः व्ययायमृत्युकेन्द्रेषु १२।११।८।१।४।६।१० शुभः। शुक्रात् त्रिचतुःसुतनवमस्थद्युनायगः ३।४।५।८।१०।६।११ स्तेषु शुभः।

भावार्थः- लग्न से ३।६।११।१० स्थानों में चन्द्रमा शुभ होता है। चन्द्रमा अपने स्थान से ३।६।११।१०।१।६ स्थानों में शुभ, भौम से ३।६।११।१०।२।८।५ स्थानों में शुभ, सूर्य से ३।६।११।१०।८।६ स्थानों में शुभ, शनि से ३।६।११।५ इन स्थानों में शुभ, बुध से १।४।६।१०।३।५।११।८ स्थानों में शुभ, बृहस्पति से १२।११।८।१।४।६।१० स्थानों में एवं शुक्र से ३।४।५।८।१०।६।११ स्थानों में शुभ होता है।

डॉ० सुधिरद कुमार
सहा०प्राचार्य (ज्योतिष)
रा०उ० सं० महाविद्यालय सुरवसेना,
पूर्णियाँ।

Date 08.08.20
Page 4

(9) भुजङ्गसहस्रमुक्तो यत्र स्यात्सप्तपर्णकः।
ततः सौम्ये हस्तमात्रात्पञ्चभिः पुरुषैरपः॥
वाह्यं जलं नयार्द्धे तु मण्डूको हरितो भवेत्।
हरितालनिभा भूश्च मेघाभोऽश्मा ततः शिय॥
उत्तरा सुजला ज्ञेया दीर्घा प्रवयाम्बुवाहिनी॥
इति कस्य वाक्यम्?

उत्तरम्- कश्यपस्य।

(10) तरूणां यत्र सर्वेषामधः स्थो दर्दुरो भवेत्।
वृक्षादुदग्दिशि जलं हस्तात् सार्द्धैर्नरैरपः॥
चतुर्भिः पुरुषे खाते नकुलो नीलमृत्तिका।
पीतश्वेता ततो भेकसदृशोऽश्मा प्रदृश्यते॥
इति कस्य कथनम्?

उत्तरम्- गर्गस्य।

(11) तिलकाद्दक्षिणे स्निग्धः कुशदूर्वासमायुतः।
वल्मीकाच्चोत्तरे पञ्चहस्तान सन्त्यज्य पश्चिमे॥
नरैः पञ्चभिरम्भोधः शिरा पूर्वोत्र विद्यते॥
कस्य वाक्यानीमानि?

उत्तरम्- कश्यपस्य।

(12) कपित्थस्य कस्यां दिशि तोयं भवति?

उत्तरम्- दक्षिणस्याम्।

(13) हरिद्रतरो कस्यां दिशि जलम्?

उत्तरम्- पूर्वस्याम्।

(14) अश्मन्तकवृक्षस्य कस्मिन भागे जलं लभ्यते?

उत्तरम्- वामभागे।

(15) खर्जूरवृक्षस्य कस्यां दिशि जलं लभ्यते?

उत्तरम्- पश्चिमायां दिशि।

डॉ० सुधिर कुमार
सहा० प्राध्यापक (ज्योतिष)
रा० आ० सं० महावि० फुबसेना, पूर्णिया

वस्तुनिष्ठप्रश्नाः

शास्त्री-II,I

Date 08·08·20
Page 3

(1) निर्गुण्डीवृक्षस्य कस्यां दिशि जलं लभ्यते ?

उत्तरम् - दक्षिणस्याम् ।

(2) पूर्वभागं बदर्याश्चेद्वल्मीको दृश्यते जलम् ।
पश्चाद्धस्तत्रये वाच्यं खाते तु पुरुषत्रये ॥
कस्य वाक्यमिदम् ?

उत्तरम् - सारस्वतस्य ।

(3) पलाशयुक्ता बदरी यत्र दृश्या ततोऽपरे ।
हस्तत्रयाद्धस्तोयं सपादे पुरुषत्रये ॥
नरे तु डुण्डुभः सर्पो निर्विषश्चिह्नमेव च ।
अक्षस्तोयं च सुस्वादु दीर्घकालं प्रवाहितम् ॥
इति कस्य वाक्यम् ?

उत्तरम् - सारस्वतस्य ।

(4) बिल्वोदुम्बरयोगे कस्यां दिशि जलं भवति ?

उत्तरम् - दक्षिणस्यां दिशि ।

(5) निर्मथे यत्र कम्पिल्लो दृश्यस्तस्मात् करत्रये ।
प्राच्यां त्रिभिर्नरैर्वारि सा भवेद्दक्षिणा शिरा ॥
अधो नीलोत्पलाभासा मृत्कापोतप्रभा क्रमात् ।
हस्तेऽजगन्धको मत्स्यो जलमल्पमशोभनम् ॥
इति कस्य वचनम् ?

उत्तरम् - सारस्वतवचनम् ।

(6) विभीतकस्य याम्यायां वल्मीको यदि दृश्यते ।
करद्वयान्तरे पूर्वे सार्धे च पुरुषे जलम् ॥
इति वाक्यं कस्य ?

उत्तरम् - सारस्वतस्य ।

(7) कस्य वृक्षस्य कस्यां दिशि जलं भवति ?

उत्तरम् - पूर्वस्याम् ।

(8) मधूकवृक्षस्य कस्यां दिशि तोयं भवति ?

उत्तरम् - पश्चिमायाम् ।

P.T.O